“सततं यं पिवेत्तोयं न तृप्तिमधिगच्छति । मुहुः काङ्क्षति तोयन्तु तं तृष्णार्द्दितमादिशेत् । वातजायालक्षणमाह । क्षामास्यता मारुतसम्भवायां तोदस्तदा शङ्खशिरःसु चापि । स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति” । शङ्खशिरःसु शङ्खयोः शिरसि च । स्रोतो निरोधः । पित्तजामाह “मूर्च्छान्नविद्वेषविलापदाहरक्तेक्षणत्वं प्रततश्च शोषः । शीताभिनन्दो मुखतिक्तता च पित्तात्मिकायां परिधूपनञ्च” । विलापः प्रलापः प्रततश्च शोषः अविरतश्च शोषः । शीताभिनन्दः शीतेच्छा । परिधूपनं कण्ठाद्धूमनिर्गम इव । कफजामाह । “वाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेन्नरस्य । निद्रागुरुत्वं मधुरास्यता च तयार्द्दितः शुष्यति चातिमात्रम्” । अग्नौ जठराग्नौ । कफसंवृते स्वकारणकुपितेन कफेनोपरिष्टादाच्छादिते । वाष्पावरोधात् अग्नेरूष्मावरोधात् । अवरुद्धानलोष्मणाम्बुवहस्रोतःशोषणात् बलासेन कफेन नरस्य तृष्णा भवेत् । तया तृष्णया अर्द्दितः पीड़ितः शुष्यति कृशो भवति । क्षतजामाह । “क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु” । क्षतस्य शस्त्रादिक्षतयुक्तस्य । रुक् पीड़ा । क्षयजामाह । “रसक्षयाद् या क्षयसम्भवा सा तयाभिभूतस्तु निशादिनेषु । पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः । रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग् व्यवस्येत्” । रसक्षयलक्षणानि सुश्रुतेनोक्तानि “रसक्षये हृत्पीड़ा कम्पः शोषः शून्यता तृष्णा चेति” । व्यवस्येत् जानीयात् । आमजामाह । “त्रिदोषलिङ्गामसमुद्भवा च हृच्छूलनिष्ठीवनसादकर्त्री” । भुक्तोद्भवामाह । “स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्वन्नमेवाशु तृषां करोति” । लवणञ्चेति चकारात् कटु च । उपसर्गजामाह “क्षीणस्वरः प्रताम्य दीनाननहृदयशुष्कगलतालुः । भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा” । शोषिणी धातुशोषिणी । उपसर्गानाह । “ज्वरमोह क्षयः श्वासो बाधिर्य्यं कास एव च । बहिर्निर्गतजिह्वत्वं सप्तैते तदुपद्रवाः” । तद्युक्तायां अरिष्टत्वञ्चाह “ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहिनाम् । सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम् । घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः” । आदिशब्दादतीसारादीनां ग्रहणम् । अतिप्रसक्ताः निरन्तराः । घोरोपद्रवयुक्ताः अतीव मुखशोषादियुताः ।

तृष्णाशब्दस्य वरुत्रीशब्देन द्वन्द्वे उभयपदे प्रकृतिस्वरः ।

**तृष्णाक्षय** पु० तृष्णायाः क्षयो यत्र । १शान्तिगुणे हेमच० । ६त० । २पिपासानाशे च ।

**तृष्णारि** पु० ६त० । १पर्पटे राजनि० । २तृष्णानाशके च ।

**तृष्णालु** त्रि० तृष्णा+अस्त्यर्थे आलु । तृष्णायुक्ते । “तृष्णालुर्भवति पूतनागृहीतः” सुश्रु० ।

**तृष्य** त्रि० तृष–ऋदुपधत्वात् क्यप् । १लोभ्ये २एषणीये । भावे क्यप् । ३लोभे न० । तृष्यमस्त्यस्य मतुपि वेदे दीर्घः । तृष्यावत् । तृष्णायुक्ते । “अभ्यवर्षीत् तृष्यावतः प्रावृषागतायाम्” ऋ० ७।१०३।३। तृष्यावतस्तृष्णावतः” भा० ।

**तृह** हिंसे तु० पर० सक० वेट् । तृहति अतर्हीत् अतृक्षत् ।

**तृह** हिंसे वा चु० उ० पक्षे रुधा० पर० सक० वेट् । तर्हयति ते तृणेढि अततर्हत् त अतीतृहत् त अतर्हीत् अतृक्षत् । “तृणेढु रामः सह लक्ष्मणेन” भट्टिः ।

**तॄ** तरणे प्लवने अभिभवे च भ्वा० प० सक० सेट् । तरति अतारीत् । ततार । “तरति ब्रह्महत्यां योऽश्वमेधेन यजते” तरति शोकमात्मवित्” श्रुतिः शत० ब्रा० १४।७।१।२२ “ततार ताराधिपखण्डधारी” कुमा० “क्रमेण तस्मिन्नथ तीर्णदृक्पथे” नैष० । तेरतुः । तरीरिता तरि(री)ष्यति । तीर्य्यात् । तरीतुं तरितुं तीर्त्त्वा तीर्य्यते । तारयति तितीर्षति । “तितीर्षुर्दुस्तरं मोहात्” रघुः । “तान्स्तुतं प्रयच्छामीमित्यत्रार्षः इड्भावः ।

अति+अतिक्रम्य गमने । “स्वर्गानतितरन्ति ते” हितो० । “न यस्य कश्चातितितर्त्ति मायाम्” भाग० ८।५।३०। यङ्लुङोरूपम् ।

वि+अति+विशेषेण अतिक्रमे । “यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति” गीता । [नीम्” भा० द्रो० २८० ।

अभि+उल्लङ्घने । “कथं नाभ्यतरामस्तां पाण्डवानामनीकि-

अव+अवनमने । “अथोरुदेशादवतार्य्य पादम्” कुमा० । अवतारः । “अवतरतः सिद्धिपथं शब्दस्य मनोरथस्य वा” मालविकाग्नि० ।

उद्+उत्थाने अक० । “सपत्वलोत्तीर्णवराहयूथम्” रघुः । उल्लङ्घने सक० । “उदतारीदुदन्वन्तम्” “उदतारिषुरम्भोधिम्” भट्टिः । [१५५६६ श्लो० ।

निस्+निःशेषेण तरणे । “कथञ्च निस्तरेयास्मात्” भा० व० ।

वि+दाने । “तड़िल्लेखालक्ष्मीर्वितरति पताकावलिरियम्” “ज्योत्स्ना शङ्कामिह वितरति” १ किरा० ।

सम्+सम्यक् तरणे (साँतार देखोया) ।